त्रयोदशः पाठः

# गोपालकः दामोदरः

महाकवेः भासस्य स्थानं संस्कृतसाहित्ये नितान्तमहनीयमुदात्तं च विद्यते। 'बालचरितम्' महाकवेः भासस्य उत्कृष्टरचनास्ति। एतस्मिन् नाटके भगवतः कृष्णस्य बाललीलायाः गोसेवायाश्च वर्णनमस्ति। कृष्णस्य जन्मतः उग्रसेनस्य पुनः राज्याभिषेकपर्यन्तं वर्णनम् अत्र विद्यते। विशेषतः श्रीमद्भागवतस्य तु एतत् सारमेव। अस्मिन् नाटके पञ्चाङ्काः। प्रस्तुतः नाट्यांशः 'तृतीयाङ्कात्' गृहीतः। अस्मिन् पाठे गोपालगणाः गोसेवां कुर्वन् कृष्णस्य गाथां गायन्ति। कृष्णजन्मना गोधनस्य अपूर्वा वृद्धिर्जाता। श्रीकृष्णः गाः गोपालान् च रक्षति।

**वृद्धगोपालकः** – भो मेघदत्त ! खलु, वृषभदत्त ! खलु, कुम्भदत्त ! खलु घोषदत्त ! एतस्मिन् वृन्दावने प्रकामं पानीयं पीत्वा हुम्भारवं कुर्वदायातु गोधनम्। अरे दामक ! भगवतीः सुस्थलेऽवतार्य सहवत्साः त्वमपि आगच्छ।

**दामकः** – अहो महत् तृणजालं स्वामिनो नन्दगोपस्य। सुतजननदिनात् आरभ्य अधिकतरम् आनन्दाद्भुतं वर्धते। भवतु इह तिष्ठतु गोधनं, यावन्मातुलमुपसर्प्स्यामि। मातुल ! वन्दे।

**वृद्धगोपालकः** – शान्तिर्भवतु अस्माकं गोधनस्य च।

**दामकः** – मातुल ! यदा प्रभृति नन्दगोपपुत्रः प्रसूतः, तदा प्रभृत्यस्माकं गोधनं वर्जितरोगं संवृत्तम्। ननु सर्वेषां गोपजनानां प्रीतिर्वर्धते, अन्यच्च खाते खाते मूलानि, फलानि गुल्मे गुल्मे। मधु कियद् दुह्यते क्षीरं तावद् एव घृतम्।

**वृद्धगोपालकः** – अन्यच्च इदमाश्चर्यम्। मास परिवृत्तो नन्दगोपपुत्र एकस्मिन् गेहे गत्वा क्षीरं पिबति, अन्यस्मिन् गेहे गत्वा दधि भक्षयति, एकस्मिन् गेहे गत्वा नवनीतं गिरति, अन्यस्मिन् गेहे गत्वा पायसं भुङ्क्ते अपरस्मिन् गेहे गत्वा तक्रघटं प्रलोकते। ततो रुष्टाभिर्गोपयुवतिभिर्नन्दगोप्यै उक्तम्। ततो रुष्टया नन्दगोप्या दाम गृहीत्वा तस्य मध्ये बद्ध्वा शेषमुलूखले बद्धम्। ततः तदपि उलूखलम् आघट्टयत् प्रेक्ष्य नन्दगोपपुत्रेण यमलार्जुनौ नाम विटपौ समूलं चूर्णीकृतौ। ततो गोपजनैरुक्तम्-महाबलपराक्रमोऽद्यप्रभृति भर्तृदामोदरो नाम भवतु इति। एतान्यन्यानि च कर्माणि कृतानि भर्तृदामोदरेण।

**दामकः** – मातुल ! अद्य भर्तृदामोदरोऽस्मिन् वृन्दावने गोपकन्यकाभिः सह हल्लीसकं नाम प्रक्रीडितुमागच्छति।

**वृद्धगोपालकः** – तेन हि सर्वैगोपजनैः सह भर्तृदामोदरस्य हल्लीसकं द्रक्ष्यामः।

**दामकः** – यद् मातुल आज्ञापयति।

(निष्क्रान्तौ)

(प्रविश्य)

**वृद्धगोपालकः** - आटोपसज्जाः पटहरूपवेषा व्याहर्तुं गच्छामः। अस्माकं गोपकन्यकाः। घोषसुन्दरि ! वनमाले ! चन्द्रेरेखे ! मृगाक्षि ! आगच्छतागच्छत शीघ्रम्।

**(ततः प्रविशन्ति सर्वाः)**

**सर्वाः** - मातुल ! वन्दामहे।

**वृद्धगोपालकः** - दारिकाः ! एष भर्ता दामोदरः गोक्षीरपाण्डुरेण भर्त्रा सङ्कर्षणेन सह गोपालकैश्च परिवृतः गुहानिक्षिप्तः सिंह इवेत एवागच्छति।

(ततः प्रविशति गोपजन परिवृतो दामोदरः सङ्कर्षणश्च)

**दामोदरः** - (सविस्मयम्) अहो प्रकृत्या रमणीयानां गोपकन्यकानां वेष ग्रहण-विशेषः।

**सङ्कर्षणः** - एते गोपदारकाः समागताः।

**वृद्धगोपालकः** - आम् भर्तः ! सर्वे सन्नद्धा आगताः।

**दामोदरः** - घोष सुन्दरि ! वनमाले ! चन्द्रेरेखे ! मृगाक्षि ! अयं हल्लीसकनृत्तबन्धं उपयुज्यताम्।

**सर्वाः** - यद् भर्ताज्ञापयति।

**सङ्कर्षणः** - दामक ! मेघनाद ! वाद्यन्ताम् आतोद्यानि।

**उभौ** - भर्तः ! तथा।

**वृद्धगोपालकः** - भर्तः ! यूयं हल्लीसकं प्रक्रीड्य। अहमत्र किं करोमि।

**दामोदरः** - प्रेक्षको भवान् ननु।

**वृद्धगोपालकः** - भर्तः ! तथा।

**(सर्वे नृत्यन्ति)**

**वृद्धगोपालकः** - ही ही सुष्ठु गीतम्। सुष्ठु वादितम्। सुष्ठु नर्तितम्। यावदहमपि नृत्यामि। परिश्रान्तः खलु अहम्।

**(प्रविश्य)**

**गोपालकः** - हा हा भर्ता अपक्रामत्वस्माद् देशाद्।

**दामोदरः** - दामक ! किमसि सम्भ्रान्तः।

**गोपालकः** - एषः अरिष्टवृषभो नाम दानवः, यस्य घोषो मेघरव इति शङ्कितो जातः।

**दामोदरः** - एवं, प्राप्तोऽरिष्टर्षभः। इमा नो गोपदारिका दारकांश्च गृहीत्वैतत् पर्वतशिखरमारुह्य दुरात्मनो मम च युद्धविशेषं पश्यत्वार्यः। अहमस्य दर्पप्रशमनं करोमि।

**(सङ्कर्षणस्तैः सह निष्क्रान्तः)**

**अरिष्टर्षभः** - (प्रविश्य) क्व नु खलु गतो नन्दगोपपुत्रः। भो नन्दगोपपुत्र ! क्वासि।

**दामोदरः** - भो गोवृषाधम ! इत इतः। एष स्थितोऽस्मि।

**अरिष्टर्षभः** - भो ! बालस्त्वम्। अतः खलु भयं न जानासि ?

**दामोदरः** - भो गोवृषाधम ! किं बाल इति मां प्रधर्षयसि ?

**अरिष्टर्षभः** – भो नन्दगोपपुत्र ! किं व्यवसितम् ?

**दामोदरः** – त्वां निधनमुपनेतुम्।

**अरिष्टर्षभः** – समर्थो भवान् ?

**दामोदरः** – कः संशयः ?

**अरिष्टर्षभः** – तेन हि प्रवर्ततां युद्धम्।

**दामोदरः** – भो गोवृषाधम ! यदि ते शक्तिरस्ति, मां पादेनैकेन स्थितं स्थानात् कम्पय।

**अरिष्टर्षभः** – कोऽत्र संशयः। (तथा कर्तुं चेष्टयित्वा मूर्च्छितः पतति)।

**दामोदरः** – भो गोवृष ! समाश्वसिहि समाश्वसिहि। अनेन वीर्येण भवान् गर्वितः।

**अरिष्टर्षभः** – (आश्वस्य, आत्मगतम्) अहो ! दुष्प्रसह्योऽयं बालः।

**रुद्रो वाऽयं भवेच्छक्रो विष्णुर्वापि स्वयं भवेत्।**
**अमिथ्या खलु मे तर्कः स एव पुरुषोत्तमः ॥1॥**

इतोऽपि –

**यत्र यत्र वयं जातास्तत्र तत्र त्रिलोकधृत्।**
**दानवानां वधार्थाय वर्तते मधुसूदनः ॥2॥**

भवतु, विष्णुना हतस्यापि अक्षयो लोको मे भविष्यति। तस्मात् युद्धमेव कृत्वा विष्णुलोकं प्राप्नोमि।

**(जवनिकापातः)**

## शब्दार्थः

तदाप्रभृति - तावत् आरभ्य (तब से लेकर)। शान्तिर्भवतु - स्वस्त्यस्तु, शमनमस्तु। खाते-खाते - गर्ते गर्ते (गड्डे, गड्डे में)। गुल्मे - लतायाम्। गिरति - चर्वणेन विना खादति। प्रलोकते - अवलोकयति। विटपौ - वृक्षौ। हल्लीसकम् - नृत्यविशेषम्। दाम - रज्जुम् (रस्सी को)। व्याहर्तुम् - वक्तुम्। प्रेक्षकः - दर्शकः। अपक्रामतु - पलायतुम्। आतोद्यानि - वाद्यानि। गोक्षीरपाण्डुरेण - गोक्षीरवत् पीतधवलवर्णेन। समाश्वसिहि - धैर्यं धारय। आटोपसज्जाः-कृत्रिमसज्जा

## अभ्यासः

1. **एकपदेन उत्तरत –**

(क) दामोदरः कस्य पुत्रः ?

(ख) वृद्धगोपालकः दामकस्य कः ?

(ग) कः क्षीरं पिबति ?

(घ) दामोदरेण कौ चूर्णीकृतौ ?

(ङ) अत्र नृत्यस्य नाम किम् ?

(च) दामोदरः काभिः सह प्रकीडितुमागच्छति ?

**2. एकवाक्येन उत्तरत -**

(क) कदा अधिकतरम् आनन्दं वर्धते ?

(ख) रुष्टाभिः गोपयुवतिभिः कस्यै उक्तम् ?

(ग) दामोदरः कुत्र आरुह्य युद्धविशेषावलोकनाय गोपालकं निर्दिशति ?

(घ) सङ्कर्षणः कैः सह निष्क्रान्तः ?

(ङ) कयोः मध्ये युद्धं सञ्जातम् ?

**3. त्रिचतुर्भिर्वाक्यैः उत्तरत -**

(क) नन्दगोपपुत्रजननदिनात् आरभ्य किं किं परिवर्तनमभवत् ?

(ख) मासपरिवृत्तो नन्दगोपपुत्रः किं किं करोति ?

(ग) कृष्णस्य दामोदर इति नाम कथं प्रसिद्धम् ?

**4. युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | अन्यस्मिन् गेहे गत्वा | अस्माकं गोधनस्य च |
| (ख) | हल्लीसकम् | वर्तते मधुसूदनः |
| (ग) | वृद्धगोपालकः | दधि भक्षयति |
| (घ) | दानवानां वधार्थाय | नृत्तबन्धम् |
| (ङ) | शान्तिर्भवतु | मातुलः |

**5. अधोलिखितपदानां विभक्तिं वचनं च लिखत -**

| पदम् | विभक्तिः | वचनम् |
|---|---|---|
| (क) गोपजनानाम् | | |
| (ख) युवतिभिः | | |
| (ग) दामोदरस्य | | |
| (घ) यस्य | | |
| (ङ) स्थानात् | | |
| (च) माम् | | |
| (छ) पादेन | | |

**6. अधोलिखितानां रेखाङ्कितपदानां विभक्तिं लिखत -**

(क) ननु **सर्वेषां** गोपजनानां प्रीतिर्वर्धते।

(ख) सर्वै: **गोपजनै:** सह हल्लीसकं द्रक्ष्याम: ।

(ग) **विष्णुना** हतस्यापि अक्षयो लोको मे भविष्यति।

(घ) महत् तृणजालं स्वामिनो **नन्दगोपस्य** ।

(ङ) दामोदर: **वृन्दावने** नृत्यति।

(च) **प्रकृत्या** रमणीयानां गोपकन्यानां वेषग्रहणविशेष: ।

(छ) शान्तिर्भवतु **अस्माकं** गोधनस्य च।

**7. अधोलिखितक्रियापादानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| द्रक्ष्याम: | | | | |
| पिबति | | | | |
| भवत | | | | |
| गच्छत | | | | |
| वन्दामहे | | | | |
| जानामि | | | | |
| कम्पय | | | | |

**8. प्रकृतिप्रत्ययौ पृथक् कुरुत -**

(क) गत्वा

(ख) व्याहर्तुम्

(ग) निक्षिप्त:

(घ) पीत्वा

(ङ) प्रक्रीडितुम्

(च) आश्वस्य

(छ) कर्तुम्

**9. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) पश्यत्वार्य:

(ख) अन्यच्च

(ग) शान्तिर्भवतु

(घ) शक्तिरस्ति

(ङ) कोऽत्र

(च) आनन्दाद्भुतम्

(छ) एतान्यन्यानि

## 10. नामोल्लेखपूर्वकं समासविग्रहं कुरुत -

| पदम् | समासविग्रहः | समासस्य नाम |
|---|---|---|
| नन्दगोपपुत्रः | नन्दगोपस्य पुत्रः | षष्ठी तत्पुरुषः |
| दामोदरः | | |
| गोक्षीरपाण्डुरेण | | |
| सिंहपुरुषः | | |
| पुरुषोत्तमः | | |
| त्रिलोकम् | | |
| तृणजालम् | | |

## योग्यताविस्तारः -

- नाट्यांशस्य विद्यालये मञ्चनं कुरुत।
- महाकावेः भासस्य अन्यानि नाटकानि पठत।